# आदर्श–प्रश्नपत्रम्
# द्वादशी परीक्षा–2012
# संस्कृतम् (सामान्यम्)

समय : घंटात्रयम् पूर्णाङ्कः 100

निर्देश :– (i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

1. उचित विकल्पं चित्वा लिखत– 1

(क) 'भानु+उदयः' इत्यस्य सन्धिः अस्ति–

(अ) भानुदयः (ब) भानूदयः

(स) भानोदयः (द) भानवादयः

(ख) 'दिगम्बरः' इत्यस्य पदस्य सन्धि विच्छेदः अस्ति– 1

(अ) दिग्+अम्बरः (ब) दिग+अम्बरः

(स) दिक्+अम्बरः (द) दिक+अम्बरः

(ग) विसर्गसन्धेः उदाहरणम् अस्ति– 1

(अ) सूर्योदयः (ब) मनोरथः

(स) महोदयः (द) परोपकारः

(घ) पितरौ इत्यस्मिन् पदे समासः अस्ति– 1

(अ) द्विगु समासः (ब) बहुव्रीहि समासः

(स) द्वन्द्व समासः (द) तत्पुरूष समासः

(ङ.) 'पंचानां बटानां समाहारः' अस्य सामसिक पदम् अस्ति– 1

(अ) पचमढ़ी (ब) पंचवटी

(स) पत्र्चआवटी (द) पचावटी

(च) 'बहुव्रीहि समासस्यः' उदाहरणम् अस्ति– 1

(अ) चन्द्रकला (ब) चन्द्रोदयः

(स) चन्द्रशेखरः (द) चन्द्रेशः

(छ) 'बाणहतः' इत्यस्मिन् समासः अस्ति– 1

(अ) नञ तत्पुरूषः (ब) सप्तमी तत्पुरूषः

(स) तृतीया तत्पुरूषः (द) द्वितीया तत्पुरूषः

2. उचित विकल्पं चित्वा लिखत–

(क) अधोलिखितेषु अव्ययम् अस्ति– 1

(अ) अस् (ब) असि

(स) अद्य (द) अस्ति

(ख) 'बालकः पुनः मोदकम् इच्छति' इत्यस्मिन् वाक्ये अव्ययम् अस्ति– 1

(अ) बालकः (ब) पुनः

(स) मोदकं (द) इच्छति

(ग) अधोलिखितेषु अव्ययं नास्ति– 1

(अ) अत्र (ब) तत्र

(स) कुत्र (द) पत्रम्

(घ) 'अधोलिखितेषु' अव्ययम् नास्ति— 1

(अ) भूयः (ब) कवयः

(स) नद्यः (द) भवः

प्र.3 (क) 'भविष्यति' इत्यस्मिन् पदे वचनम् अस्ति — 3

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम्

(ख) 'क्रुध्यतु' इत्यस्मिन् पदे लकारः अस्ति—

(अ) लट् लकारः (ब) लृट् लकारः

(स) लड्.ग लकारः (द) लोट् लकारः

(ग) 'लभते' इत्यस्मिन् पदे पुरूषः अस्ति—

(अ) अन्य पुरूषः (ब) मध्यम पुरूषः

(स) उत्तम पुरूषः

प्र.4 क. 'पठन्' इत्यस्मिन् पदे प्रत्ययः अस्ति— 4

(अ) टाप (ब) ल्यप्

(स) शानच् (द) शतृ

ख. 'विज्ञाय' इत्यस्मिन् पदे कः प्रत्ययः—

(अ) ल्यप् (ब) यत्

(स) क्त्वा (द) वि

ग. अधोलिखितेषु 'मतुप्' प्रत्ययस्योदाहरणं अस्ति—

(अ) बुद्धिमानः (ब) मोदमानः

(स) सेवमानः (द) वर्धमानः

घ. 'बाला' इति प्रत्ययस्य उदाहरणम् अस्ति—

(अ) टाप (ब) डि.प

(स) डी.ष् (द) डी.ण्

प्र.5 उचित विकल्पं चित्वा लिखत— 5

क 'दूरम्' इत्यस्य विलोम शब्दः अस्ति—

(अ) संकटम् (ब) निकटम्

(स) शकटम् (द) विकटम्

ख. 'अनाश्रयः' इत्यस्य विलोम शब्दः अस्ति—

(अ) गृहाश्रयः (ब) पराश्रयः

(स) आश्रयः (द) निराश्रयः

ग. 'गृहम्ः' इत्यस्य पर्यायवाचीशब्दः अस्ति—

(अ) रूदनम् (ब) वचनम्

(स) हसनम् (द) सदनम्

घ. अल्पारम्भः ———————।

(अ)क्षेमकरः (ब) दुःखकरः

ड. ——————————— चक्षुर्मनुष्याणाम्।

(अ) ज्ञानम् (ब) विज्ञानम्

प्र.6 उचित विकल्पं चित्वा लिखत— 3

क. 'विदूषः' पदे विभक्तिः अस्ति—

(अ) चतुर्थी (ब) षष्ठी (स) प्रथमा (द) सप्तमी

ख. 'अमुषु' इत्यस्मिन् पदे वचनम् अस्ति—

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम्

ग 'मनस्' (मन) शब्दस्य तृतीया एकवचने रूपं अस्ति–

(अ) मनः (ब) मनसा

(स) मनसः (द) मनसि

प्र.7 युग्म–मेलनम् कुरुत– 4

| | | |
|---|---|---|
| क) | यज्ञाद् भवति | पर्यावरणस्य मूलधायकाः |
| ख) | पण्डितराज जगन्नाथ | प्रशान्तम् |
| ग) | न वैरम् उद्दीपयति | गड्.गालहरी |
| घ) | वृक्षाः | पर्जन्यः |

प्र.8 अधोलिखितेषु चतुर्णां प्रश्नानाम् उत्तराणि एकपदेन लिखत– 4

क) स्पंदना कस्य अड्.के उपविष्टवती ?

ख) कस्य धैर्यज्वलितं हि तेजः ?

ग) भरतस्य मातुः नाम किम् अस्ति ?

घ) विश्व पर्यावरण दिवसः कदा आयोज्यते ?

ड.) कण्वस्य पुत्र्याः नाम किम् ?

प्र.9 अधोलिखितेषु त्रयाणां प्रश्नानाम् उत्तराणि एक वाक्येन लिखत– 6

क) महोअर्णः सरस्वती कुत्र विराजति ?

ख) लोकसंग्रहार्थे कथं कर्म करणीयम् ?

ग) इन्द्रोऽपि कदा लघुतां याति ?

घ) राजभवनं त्यक्ता के के प्रस्थिताः ?

प्र.10 अधोलिखितेषु पंच अशुद्ध कारक वाक्यानां शुद्धि करणीया– 5

क) शिक्षकस्य सह छात्रः गच्छन्ति।

ख) हरिं नमः।

ग) गड्.गा हिमालयस्य प्रभवति।

घ) वृक्षे पत्राणि पतन्ति ।

ड.) जलाय विना मीनः न जीवति।

च) धनः कोषं अस्ति।

प्र.11 अधोलिखितेषु एकस्य कवि–परिचयं लिखत। 4

(अ) महाकवि कालिदासः

(ब) वेदव्यासः

(स) बाणभट्टः

प्र.12 प्रदतैः शब्दैः अनुच्छेदलेखनं करुत– 4

(षट्, भवति, प्रमोदो, नृत्यन्ति, वसन्तः, उत्सवौ, नराः, पूर्णिमायां)

भारते–––––––ऋतवः सन्ति। तेषु–––––––––ऋतुराजः कथ्यते। चैत्रे वैशाखे च मासे ––––––––––वसन्तः –––––––––। वसन्तौ दौ प्रमुखौ –––––––––– भवतः– वसन्तोत्सवः होलिकोत्सवः च। वसोन्तोत्सवे सर्वत्र–––––––––भवति।––––––––––– नार्यश्च सर्वत्र गायन्ति–––––––– चा होलिकोत्सवः फाल्गुनमासस्य––––––––– भवति।

अथवा

(श्रुत्वा, सिद्धार्थस्य, शरीरात्, हंसं, निपतितः, उपवनं, हंसः, मम)

एकदा राजकुमार सिद्धार्थः विहारार्थम्–––––––––गतः। सहसा क्रन्दनध्वनिं––––––––– य इतस्ततः अपश्यत्। बाणेन् बिद्धः एकः –––––––––भूमौ पतितः आसीत्। एतत् दृष्ट्वा––––––– चित्तं करूणया व्याकुले जातम्। सः धावित्वा हंसस्य––––– बाणं निष्कास्य तम् अड़े.क अधारयत्। अत्रान्तरे धावन् देवदत्तः तत्र प्राप्तः। सिद्धार्थस्य हस्ते–––––––––

——————— दृष्ट्वा सः उच्चैः अवदत्—सिद्धार्थ ! ऐषः हंसः मया बाणेन————————। अतः——————
देहि।

13 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषित द्वयं लिखत— 4

14 प्रदत्तैः शब्दैः चतुर्णां वाक्यानां रिक्तस्थानपूर्तिं कुरुत— 4

(यज्ञात्, नाटकं, संयतो, सृष्टेः, क्षीणतोयां))

(क) सुखार्थी .................... भवेत्।

(ख) वृष्टिः ................... भवति।

(ग) पर्यावरण संरक्षणमेव .................. संरक्षणम्।

(घ) पिपासातोऽनु धावामि ................. नदीमिव।

(ड.) सुखदःखोत्पत्तिकृतं ............... भवति।

15. अधोलिखितेषु एकस्य साहित्यिकं परिचयं लिखत— 4

क) रामायणम्

ख) महाकाव्यपरम्परा

ग) वैदिक साहित्यिम्

16. अधोलिखितेषु अपठित गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत— 5

संसारे जनाः सुखम् इच्छन्ति। सुखं च धनेन एव प्राप्तुं शक्यते। अतः धनोपार्जनस्य आवश्यकता भवति। सः सुखेन शेत्ते। निर्धनं पुरूषं तु मित्राणि अपि त्यजन्ति। चौर्येण कपटेन च प्राप्तं धनं फलति तेनैव सुखं प्राप्यते। धनहीनोऽनि सुखीभवेत्

क) कुत्र जनाः सुखम् इच्छति ?

ख) केन् प्राप्तं धनं विनाशकरं भवति ?

ग) सुखं कथं प्राप्तुं शक्यते ?

घ) संसारे कः सुखी भवति ?

ड.) गद्यांशस्य उचित शीर्षकं लिखत।

17. अधोलिखितेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि लिखत— 8

(1) वृक्षाः पर्यावरणस्य मूलधायका सन्ति। तेषा कर्तने एव जलप्लावनं भवति। जलप्लावनेन बहवो ग्रामाः ध्वंसन्ते। अकाले भूकम्पनं भवति। भूक्षरणमपि भवति अतः अस्माभिः वृक्षारोपणम् अवश्यं कर्त्तव्यम्। प्रकृवेर्ये प्रमुखघटकास्ते सर्वे भारतीय संस्कृतौ देवतावत् पुज्याः। पर्यावरण—सन्धारणे तेषां महन्महत्वम्। गड्.गायमुना प्रभृतयः सरितो मातृवतपूज्याः, ताः जीवनप्रदायिन्यः कृषि सिञ्चनक्षेत्रे तासां महती भूमिका, तासां संरक्षणेन जनानां जीवनं प्रमोदान्वितम्।

क) वृक्षाः कस्य मूलधायकाः सन्ति ?

ख) केन बहवो ग्रामा ध्वसन्ते ?

ग) अस्माभिः किम् अवश्यं कर्त्तव्यम् ?

घ) काः सरितो मातृवत्पूज्याः ?

ख) आसीत् पुरा कश्चित् सत्यव्रतो नाम महाराजः। सः सत्यमेव सर्वेषाम् आदर्शो जीवितलक्ष्यं च समाचरन् सर्वेषाम् आदर्शो व्यराजत्। एकदा ब्रह्ममुहुर्ते शयनात्दुत्थाय नदीस्नानार्थं प्रस्थितः। सिंहद्वारसमीपे कात्रिचद् सुन्दरीं सवेंग बहिर्गच्छन्तीं दृष्ट्वा पृष्टवानेवम् 'अयि। सुन्दरि! का त्वं ? राजभवनात् किमर्थं निर्गच्छसि ? सा प्राह—भो महाराज ! अहं धनलक्ष्मीः चिरात्तत्तैव भवनं मया निवासाय अङ्.ीगकृतम् अधुना अंह भवनमिदं विहाय गन्तुमिच्छामि कृपया मेऽनुमति देहि। तस्याः वचनानि श्रुत्वा साधु! साधु! भवती यथामति गच्छतु पुर्नदर्शनाय इति सविनयं प्राह।

क) महाराजस्य नाम किं आसीत् ?

ख) महाराजः कीदृशः आसीत् ?

ग) महाराजः ब्रह्ममुहुर्ते प्रथमतः कां अपश्यत् ?

घ) दृष्ट्वा इत्यस्मिन् पदे धातु प्रत्ययं चित्वा लिखत।

ग) महात्मा सुपारगस्तु तेषामनुकम्पया जराशिथिलशरीरेऽपि तद्वह्नमारूरोह तद्धिरोहणाच्च प्रमुदित मनसः सर्व एव ते वणिजो वभुपुनियतमस्माकं मुत्तमा यात्रासिद्धिरिति। क्रमेण चावजगाहिरेऽ प्रमेयतोयं महासमुद्रमा त्येषां तत्रानुप्राप्तानां सायाहनसमये महदोत्पातिकं प्रादुरभवत्। क्षणेन च रौद्रः समभूत् समुद्रः। अथ ते सांयात्रिकाः पवनबलचलित सलिलवेगबशगया नावा परिभ्रम्ययाणा बहुभिरप्यहोभिनैव कुतश्चित तीरं ददृशुर्न च यथोप्सितानि समुद्रचिन्हानि।

क) कः सुपारगस्तु ?

ख) सायं समये किं प्रादुरभवत् ?

ग) केन च रौद्रः समभूत समुद्रः ?

घ) क्रमेण इत्यस्मिन् पदे का विभक्तिः अस्ति ?

प्र.18 अधोलिखित पद्यांशेषु पद्यांशद्वयस्य प्रश्नानां उत्ताराणि संस्कृतभाषायां लिखत– 8

क) मानं हित्वा प्रियो भवति, क्रोधं हित्वा न शोचति।
कामं हित्वाऽर्थवान् भवति, लोभं हित्वा सुखी भवेत्।।

क) कं हित्वा न शोचति ?

ख) कामं हित्वा कथं भवति ?

ग) मानं हित्वा कथं भवति ?

घ) कं हित्वा सुखी भवेत् ?

ख) समद्धं सौभाग्यं सकलवसुधायाः किमपितन्,
महैश्वर्यं लीलाजनितजगतः खण्डपरशोः।
श्रुतीनां सर्वस्वं सुकृतमय मूर्तं सुमनसां
सुधा सौन्दर्यं ते सलिलमशिवं नः शमयतु

क) कस्या समृद्धं सौभाग्यं अस्ति ?

ख) ते सलिलं नः किं शमयतु ?

ग) सलिलस्य सौन्दर्यं कीदृशमस्ति ?

घ) 'महैश्वर्यम्' इति पदस्य सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत।

ग) वने रणे शत्रुजलाग्निमध्ये पुण्यानि पुराकृतानि।
सुप्त प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यामि पुराकृतानि।।

क) कस्मिन् रणे शत्रुजलाग्निमध्ये पुण्यानि रक्षन्ति ?

ख) पुण्यानि कानि रक्षन्ति ?

ग) 'रणे' इत्यस्मिन् पदे विभक्तिः अस्ति ?

घ) सुप्तम् इति पदस्य पर्याय शब्दं लिखत ?

प्र. 19 स्वस्य प्राचार्यस्य कृते स्थानान्तरण प्रमाण पत्रं प्राप्तुम् आवेदन पत्रं लिखत। 4

अथवा

स्वस्थ मित्रस्य कृते एकं पत्रं लिखत यस्मिन् स्वाध्यायस्य वर्णनं भवेत्।

प्र. 20 अधोलिखितेषु एकस्मिन् विषये शतशब्देषु संस्कृते निबन्धं लिखत– 10

क) संस्कृतभाषायाः गौरवम्

ख) ग्राम्यजीवनम्

ग) शरदवर्णनम्

घ) लोकमान्य तिलकः

# आदर्श–उत्तरपत्रम्
# द्वादशी परीक्षा–2013
# संस्कृतम् (सामान्यम्)

| | | | | |
|---|---|---|---|---|
| (1) | (क) | ब. | भानूदयः | 7 |
| | (ख) | स. | दिक्+अम्बरः | |
| | (ग) | ब | मनोरथः | |
| | (घ) | अ | द्वन्द्व समासः | |
| | (ड.) | ब | पञ्चवटी | |
| | (च) | स | चन्द्रशेखरः | |
| | (छ) | स | तृतीया तत्पुरूषः | |
| (2) | (क) | स | अद्य | 4 |
| | (ख) | ब | पुनः | |
| | (ग) | द | पत्रं | |
| | (घ) | अ | भूयः | |
| (3) | (क) | अ | एकवचनमः | 3 |
| | (ख) | द | लोट्लकारः | |
| | (ग) | अ | अन्यपुरूषः | |
| (4) | वैकल्पिक प्रश्नानाम् उत्तराणि– | | | 4 |
| | क | द | शतृ | |
| | ख | अ | ल्यप् | |
| | ग | अ | बुद्धिमानः | |
| | घ | अ | टाप् | |
| (5) | क | ब | निकटम् | 5 |
| | ख | स | आश्रयः | |
| | ग | द | सदनम् | |
| | घ | अ | क्षेयकरः | |
| | ड. | अ | ज्ञानम् | |
| (6) | क | ब | षष्ठी | 3 |
| | ख | स | बहुवचनम् | |
| | ग | ब | मनसा | |

(7) 4

क) यज्ञात् भवति पर्जन्यः

ख) पण्डितराज जगन्नाथ गङ्.गालहरी

ग) न वैरम उद्दीपयति प्रशान्तम्

घ) वृक्षाः पर्यावरणस्य मूलधायकाः

(8) क) पितुः (अजयस्य) 6

ख) प्राज्ञस्य

ग) कैकयी

घ) जून मासस्य पंच दिनाङ्.के

ङ.) शकुन्तला

(9) शुद्ध उत्तरोपरि एक अंक प्रदेथम् 2x3=6

क) महोअर्णः सरस्वती विश्वा विराजति।

ख) लोकसंग्रहार्थे कर्त्तव्यरूपं कर्मम करणीयम्।

ग) इन्द्रोऽपि स्वयं प्रख्यापितैः गुणैः लघुतांयाति।

घ) राजभवनं त्यक्तवा धनलक्ष्मीः त्यागः सदाचारः कीर्ति च प्रस्थितः।

(10) 5

क) शिक्षकेन सह छात्राः गच्छन्ति।

ख) हरये नमः।

ग) गङ्.गा हिमालयात् प्रभवति।

घ) वृक्षात् पत्राणि पतन्ति।

ङ.) जलं/जलेन/जलात् विना मीनः न जीवति।

च) धनं कोषे अस्ति।

उत्तर 11

क) कालिदासः

महाकवि कालिदासस्य प्रादुर्भावः प्रायः पंचम्यां शताब्द्यां स्वीक्रियते। कालिदासः. महाकाव्ये, त्रीणि नाटकानि, द्वे खण्डकाव्ये च अरचयत्। तद्यथा महाकाव्यद्वयम्–रघुवंशम् कुमार सम्भवम्, नाटकानि अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम् विक्रार्वशीयम् च, खण्डकाव्यद्वयमऋतुसंहारम्, मेघदूतम्। कालिदासस्य रचनाशैली विदर्भी अस्ति। भाषा लावण्यमयी सरला च अस्ति। अस्य सर्वाणि नाटकानि श्रङ्.गारस युक्तानि सन्ति।

ख) वेदव्यासः 4

महर्षि वेदव्यासेन वीरशान्तरसयुक्तं ''महाभारतम्'' इति ऐतिहासिकं काव्यं विरचितम्। एतस्य

विकासक्रमानुसारेण ''जयम्''इति ''भारतम्'' इति ''महाभारतम्'' इति त्रीणि जातानि। अस्मिन् काव्ये प्रायः लक्षश्लोकाः सन्ति। काव्यमिदं अष्टादशपर्वसु विभक्तम्। अत्र कौरवपाण्डवानां पारस्परिक–सङ्.घर्षस्य वर्णनं प्रोक्तम्। अस्मिन् महाकाव्ये धर्मार्थकाममोक्षादयः पुरूषार्थः, पुराण–इतिवृत्त–धर्मशास्त्र–अर्थशास्त्र–राजनीति–ज्ञानविज्ञान–कला–शिल्पादयः अनेकविषयाः समाविष्टाः।

ग) बाणभट्ट :

वात्स्यायनगोत्रोत्पन्नः बाणभट्टः सप्तम्यां शताब्दयां प्रादुरभूत् संस्कृतसाहित्यस्य श्रेष्ठ गद्य रचनाकाररूपेण अस्य कवेः प्रसिद्धिरस्ति। शोणभद्र नदीतटे प्रीतिकूट क्षेत्रे बाणस्य शैशवं व्यतीतम्। हर्षचरितस्य आरम्भे गद्ये बाणेन स्ववंशस्य परिचयः दत्तोऽस्ति। हर्ष चरितं लक्षण ग्रंधानुसारंभ आख्यायिका अस्ति। अस्याम् आख्यायिकायाम् अष्टौ उच्छ्वासाः अस्ति। बाण भट्टस्य अपरः ग्रन्थ कादम्बरी अस्ति।

12 (अनुच्छेलेखन पूर्ण) ½x8=4

क) षट्
ख) वसन्तः
ग) भवति
घ) उत्सवौ
ड.) प्रमोदो
च) नराः
छ) नृत्यन्ति
ज) पूर्णिमायां

अथवा

क) उपवनम्
ख) श्रुत्वा
ग) हंसः
घ) सिद्धार्थस्य
ड.) शरीरात्
च) हसं
छ) निपातितः
ज) मह्यम्

13. पाठ्यपुस्तकधारेण शुद्धलेखनं शुद्धसुभाषित दृष्टवा अङ्.काः प्रदेयाः। 4

14.

क) संयतो

ख) यज्ञात्

ग) सृष्टेः

घ) क्षीणतोयां

ड.) नाटकं

(15) कवेः परिचयः

क) रामायणम्–

महर्षि बाल्मीकि विरचितम् आदि काव्य रामायणम् लोक विश्रुतम्। रामायेण काव्ये बाल्मीकिना ब्राह्मणः प्रेरणया रामचरितं विरचितम्। रामायणी कथा सप्तकाण्ऽेषु चतुर्विंशति सहस्त्रश्लोक युक्ता उपलभ्यते। रामायणे आदि कविना मर्यादा पुरूषोत्त्मस्य श्रीरामस्य आदर्श पुरूषत्वं मातृ पितृ देवातिथिप्रणा पुत्र भातृप्रेम व्यवहाराणामुचित वर्णनं कृतम्। रामायणस्य रचना कालः प्रायः ई.पू. 600 वर्ष पूर्वमिति विदुषां मतः।

ख) महाकाव्य परम्परा–

महाकाव्ये सन्ध्या प्रभात, यात्रा श्रृड्.गारादीनां चित्रणम् अपेक्ष्यते। सर्गान्ते सर्गादौ च छन्दः परिवर्तनम् अनिवार्यम्। न्यूनातिन्यूनमकष्टादशः सर्गाः भवेयुः। प्रमुखः अड्.गिरसः समावेष्टेव्यः नायकः पुराणेतिहास प्रसिद्धः भवेत्। कथावस्तु इतिहास पुराणादिषु उपलभ्यमानं सन् प्रसिद्धं न भवेदिति नियमः। रामायणम्, रघुवंशम् कुमार सम्भवं भट्टिकाव्यं किरातार्जुनीयम् शिशुपालनधम्नैषधीयचरितम् इत्येतानि प्रसिद्धानि महाकाव्यानि सन्ति।

ग) वैदिक साहित्यम्

''वेदोऽखिलो धर्ममूलम्'' इति मनोर्वचनम्। को नाम वेदः इति चेदुच्यते विघन्ते जायन्ते लभ्यन्ते वा धर्मादिपुरूषार्था एभिरिति वेदः। ते च वेदाः पूर्वं एकीभूताः। एकीभूतः वेदराशि ऋग्यजुष्सामाथर्व–वेदरूपेण व्यासेन विभक्तः। यत्र स्तुतिपरकमन्त्राः ऋग्वेदत्वेन, देवपूजायागादिक्रियाकलापयुक्ता मन्त्राः यजुर्वेदत्वेन, गीतरूपेण विद्यमानमन्त्राः, सामवेदलेन, विज्ञानतन्त्र ज्ञान–लौकिकेच्छाप्रदानात्मकमन्त्राः अर्थव वेदत्वेन परिगण्यन्ते।

उपनिषदः– उपनिषदः अष्टाधिकैकशतम् इति मुक्तिकोपनिषद् वदति।

उपवेदाः–चतुर्णा वेदानां चत्वारः उपवेदाः सन्ति।

ऋग्वेदस्य– आयुर्वेदः यजुर्वेदस्य–धनुर्वेदः सामवेदस्य–गान्धर्ववेदः अथर्ववेदस्य अर्थवेद(अर्थशास्त्र)

वेदाड्.गनि–वेदार्थावबोधसौकर्यार्थं वेदाड्.गनि अड्.कल्पिानि। तानि षड् उच्यन्ते–शिक्षा,कल्पम् निरूक्तम्

छन्दः, ज्योतिषम्, व्याकरणम् इति।

16. क) संसारे जनाः सुखम् इच्छन्ति। 5

ख) सुखेन प्राप्तं धनं विनाशंकर भवति।

ग) धनेन सुखं प्राप्तुं शक्यते।

घ) संसारे धन हीनः अपि सुखी भवति।

ङ.) गंद्यांशस्य उचित शीर्षकं ''सुखम्'' अस्ति।

17.अ) क) वृक्षाः पर्यावरणस्य मूलधायकाः सन्ति। 2x4=8

ख) जलप्लावेनेन बहवो ग्रामा ध्वंसन्ते।

ग) अस्माभिः वृक्षारोपणं अवश्यं कर्तव्यम्।

घ) गङ्.गा यमुना प्रभृतवः सरितो मातृवत्पूज्याः।

ब) क) महाराजस्य नाम सत्यव्रतः आसीत्।

ख) महाराजः सत्यमेव जीवित धर्मं स्वीकृत्य जीवितलक्ष्यं च समाचरन सर्वेषाम् आदर्शो व्यराजयत्।

ग) महाराजः बुह्ममुहुर्ते सुन्दरीम् (धनलक्ष्मीं) अपश्यत्।

घ) ''दृष्ट्वा'' इत्यस्मिन् पदे ''दृश्'' धातु ''क्त्वा'' प्रत्ययः अस्ति।

स) क) महात्मा सुपारगस्तु।

ख) सायं समये महदौत्पातिंक प्रादुरभवत्।

ग) क्षणेन च रोद्रः समभूत समुद्रः।

घ) ''क्रमेण'' इत्यस्मिन् पदे तृतीया विभक्तिः।

18 अ) 2x4=8

क) क्रोधं हित्वा न शोचति।

ख) कामं हित्वा अर्थवान भवति।

ग) मानं हित्वा प्रियो भवति।

घ) लोभं हित्वा सुखी भवेत।

ङ.) 'गच्छन्ति' इति पदे 'गम्' धातुः अस्ति।

ब)

क) सकलवसुधायाः समृद्धं सौभाग्यं अस्ति।

ख) ते सलिलं नः अशिवं शमयतु।

ग) सलिलस्य सौन्दर्यं सुमनसामूर्त सुकृतं सुधा सौन्दर्यं अस्ति।

घ) महा+एश्वर्यम्– वृद्धिस्वर सन्धिः

स)

क) वने रणे शत्रुजलाग्निमध्ये पुण्यानि रक्षन्ति।

ख) पुण्यानि पुराकृतानि रक्षन्ति।

ग) ''रणे'' सप्तमी विभक्तिः अस्ति।

घ) ''शयनम्''

(19)

स्थानान्तरण–प्रमाणपत्रम्

सेवायाम्,

श्रीमन्तः प्राचार्यमहोदयाः

संस्कृत विद्यालयः दमोहनगरम्

महोदयाः,

सादरं निवेदयामि यत् मम् पितुः स्थानान्तरणं शहडोलनगरं सत्र्जातम्। सकलः परिवारः अग्रिमे रविवासरे शहडोलनगरं गमिष्यति। मया अपि शहडोल नगरे एव अध्ययनं करणीयं भविष्यति

अतः विद्यालय स्थानान्तरण प्रमाण–पत्रं दत्वा भवन्तः मयि अनुग्रहं कुर्वन्तु इति प्रार्थये।

धन्यवादः।

दिनांड.क : 09 अगस्त 2012 भवताम आज्ञाकारी शिष्यः

अ, ब, स,

---

मित्रम् प्रति पत्रम्

प्रिय मित्र रमेशः।

सप्रेम नमस्तेः।

जवाहरनगरम् इन्दौर

दिनांक 9 / 08 / 2012

अत्र कुशलं तत्रास्तु। मम अध्ययनंसम्यक् चलति। वार्षिकी परीक्षां श्रेष्ठ अड्.कान् प्राप्त्यर्थं अहं कृतसंकल्पा अस्मि। प्रातः चतुर्वादने उत्थाय द्विघण्टात्मकं अध्ययनं करोमि। तत्पश्चात् सन्नद्धा भूत्वा विद्यालयं गत्वा पठामि। तत्र अध्यापकाः समस्या निवारणं अपि कुर्वन्ति। गृहे आगत्य किन्त्रित् कालं विश्रम्य दूरदर्शनं दृष्ट्वा पुनः घण्टाद्वयं पठानि। तत्पश्चात् कोचिंग कक्षायां त्रिघण्टात्मकं अध्ययनं करोमि। पाठं पठित्वा प्रश्नोत्तराणां कंठस्थीकरणं लेखनं अपि करोमि। भवान् अपि सुष्ठु अड्.कान् प्राप्त्यर्थं मार्गदर्शनं ददातु। भवतः पितरौ सादरं वन्दे।

अनुजस्य स्वस्ति।अद्य सायंकालीनसमाचारपत्रे भवतः परीक्षा परिणामः मया पठितः। एतद् ज्ञात्वा अहं अतीव हषर्म् अनुभवामि यत् भवान् द्वादशकक्षायां प्रथमं स्थानं प्राप्नोत्। मभ सर्वे परिजनाः मित्राणि च इदम् अवगत्य अतीव प्रसन्नाः अभवन्। मम् साधुवादं स्वीकरोतु। सद्यः एव पत्रोत्तरं ददातु।

भवतः मित्रम्

अ, ब, स

---

1. संस्कृतः भाषायाः गौरवम्

आर्याणां अति प्राचीना सेयम् संस्कृतभाषा। अस्यां भाषायां भारतीयानां धर्मग्रन्थाः सन्ति। पुरा संस्कृतमेव राष्ट्रभाषा आसीत्। विदेशेष्वपि संस्कृतस्य प्रचारः अभवत्। भारते संस्कृतस्य प्रचारः सदैव आसीत् अस्ति च। विश्व विद्यालयेषु छात्राः संस्कृत माध्यमेनैव सर्वान् शास्त्र विषयान् पठन्ति स्म। ऋजुजीवनं विचारौदार्यम् इति संस्कृतस्य स्वाभाविको व्यवहार। यदि वयं प्राचीन भारतं ज्ञातुम् इच्छामःतर्हि संस्कृतभाषा पठित्वा तज्ज्ञानं लभामहे।

यदा जनाः संस्कृतं पठिष्यन्ति सदाचारं च पालयिष्यन्ति तदा देशे सर्वे सुखिनो भविष्यन्ति। मनोहरा मधुरा च संस्कृत भाषा। एषा एव अस्माकं पूर्वजानाम् आर्याणां सुलभा शोभना गरिमामयी च वाणी। संस्कृतभाषायां वेदग्रन्थाः, शास्त्रग्रन्थाः, पुराण ग्रन्थाः, नाट्यग्रन्थाः च रचिता।

संस्कृतस्य पठनम् आत्मनः प्रीतये भवति। देववाणी, सुरभारती, अमरभाषा, गीर्वाणी इत्यादीनि सुख्यातानि नामानि संस्कृत भाषायाः।

2. ग्राम्यजीवनम्

भारतं ग्रामाणां देशः। भारतीय जनंसख्यायाः बहुलांशः ग्रामेषु वसति। ग्रामेषु कृषकाः श्रमिकाश्च वसन्ति। तेषां मुख्यव्यवसायो कृषिः अस्ति। ते पशून् पालयन्ति। धेनोः वत्साः क्षेत्रकर्षणे उपयोगिनः भवन्ति। ग्रामवासिनः निर्धनाः अतः सन्तुलितं भोजनं न सुलभं तेभ्यः। ते निम्नजीवनस्तराः सन्ति। ग्रामेषु समुपयोगिनां गृहाणां अभावो विद्यते। कतिपयेषु ग्रामेषु शुद्ध जलस्यापि अभावः दृश्यते।

ग्रामे प्रकृतिसौन्दर्यमपि वर्तते। इतस्ततः वृक्षाः तिष्ठन्ति। वनशोभा अपि दर्शनीया अस्ति।

ग्रामे नदी तडागौ अपि भवतः। प्रभाते सायंकाले च नदीपर्वतयोः शोभा हृदयं रंजयति। कृषकाणां वध्वः क्षेत्रेषु कार्यं कुर्वन्ति। ग्रामेषु गोमयं इन्धनरूपेण उपयुज्यते। नार्यः गो दुग्धेन दधि नवनीतं घृतं च निर्मान्ति। ताः कूपात् जलम् आनयन्ति। ग्राम्यलोकगीतानि मनोहराणि सन्ति। ग्राम्यजीवने स्नेहसद्भावस्यापि प्राप्तिः विशेषेण दृश्यते। ते परस्परं सहाय्यं कुर्वन्ति। ग्रामे ग्रामसभा अपि भवन्ति। तत्र ते स्वविवादान् स्वयमेव निर्णयन्ति। अतएव कथितम्–

''अहो रम्यं ग्राम्यजीवनम्।''

————————————

## 3. शरदवर्णनम्

भारतवर्षे षड्ऋतवः भविन्त। तेषु प्रमुखः वसन्तः ग्रीष्मः शरद् हेमन्तः शिशिरश्च। वर्षाकालान्तरं शरद् समयाति शरदि नभः मघपद्याभिः मुक्तं निर्मलं च भवाति।

कविकुलगुरूणा विकचपघ्ममनोज्ञनक्त्रा,

सोन्मादहंसरवनुपूनादरम्या।

आपक्वशालिरूचिरा नत गात्र यष्टिः,

प्राक्षा शरन्नव वधुरिव रूप रम्याः:

सूर्योदये विकसित कमलैः शोभितानि सरांसि अतिरमणीयानि भवन्ति। कृषकाः शालिक्षेत्रभ्यः प्रवहनाः जलं दृढ़ सेतुभिः रक्षन्ति।

पुरा शरदि कौमुदीमहोत्सवस्य आयोजनं प्रतिवर्षं भवति स्म। अधुनाऽपि उत्सवप्रियाः जनाः नृत्यसंगीतनौका विहारादिभिः मनोर्‌रजनं कुर्वन्ति। शरत्चन्द्रकिरणानि अमृतं वर्षयन्ति इति भावनया जनाः चन्द्रिकास्पृष्टं दुग्धं पिबन्ति। केचिद् जनाः शरदपौर्णिमायां ताजमहलस्य अपूर्वा शोभा दृष्टुं आगरा नगरं गच्छन्ति।

————————————

4. लोकमान्यतिलकः

अस्ति दक्षिणात्ये रत्नगिरिमण्डलान्तर्गते सदोवागौर ग्रामः। तस्मिन् ब्राह्मणकुलोत्पन्नः स्वनामधन्यः पण्डितः गङ्.गाधररावः प्रतिवसति स्म। तेन स्व प्रयत्नेनैव संस्कृतभाषायां गणित शास्त्रे च पाटवं प्राप्तम्। तस्यैव गृहे संवत् अष्टसप्तत्युत्तर सप्तदशशत आषाढकृष्णषष्ठ्यां सोमवासरे बालगड.ाधर तिलकों जन्म अलभत्। तस्य जन्म नाम बलवन्त रावः आसीत्।

बाल्यकाले सः नितरां कृशगात्रः समभवत्। परं सः नियमपूर्वकव्यायामेन शरीरसौष्ठवं प्राप्तवान्। तेन स्वदेशस्य भारतीयानात्र्च सेवार्थं 'केसरी' इति पत्रं। स्वातन्त्र्यम् अस्माकं जन्म सिद्ध अधिकारः अस्ति, इत्येतदमरवाक्यम् अपि उद्धोषितम्। एवं लोकमान्यतिलकस्य जीवनमस्माकं देशे कर्मयोगस्य, विद्यालयस्य धर्मबलस्य चादर्शभूतम् अस्ति।

————————————